# Ambika Trishati

# અમ્બિકાત્રિશતી

## Document Information

Text title : ambikA trishati

File name : ambikA300.itx

Category : shatI, devii, pArvatI, devI, trishatI

Location : doc_devii

Author : Gangadharamakhin

Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Latest update : July 14, 2003

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# અમ્બિકાત્રિશતી

ગઙ્ગાધરમખિવિરચિતા ।

પરમાભરણં શમ્ભોઃ પર્વતનાથસ્ય પુણ્યપરિપાકઃ ।
નિજલોચનવીક્ષણતો રક્ષિતલોકત્રયં ચ તદ્રત્નમ્ ॥ ૧॥

નિગમાન્તપરમવિદ્યા દદ્યાદદ્ય પ્રમોદમિહ નમતામ્ ।
નિખિલચરાચરચિન્મયરૂપં રક્ષાકરં ચ લોકાનામ્ ॥ ૨॥

આદૃતશિવવામાન્તામાર્યામાર્યાભિમાન્યમહિમાનમ્ ।
આગમમૌલિવતંસાં વન્દે ચિદ્રૂપકન્દલાં જનનીમ્ ॥ ૩॥

પરમશિવભાગધેયં સુરમુનિમનુજાદિભિઃ સદા ધ્યેયમ્ ।
યન્નામ કર્ણપેયં પાતુ સદા વેદમૌલિકામેયમ્ ॥ ૪॥

જયતિ તવામ્બ કટાક્ષે કો વા સેવેત કલ્પભૂમિરુહમ્ ।
કામાદિહાનિદોઽસૌ નમતાં સમ્પત્પ્રદાનકૃતદીક્ષઃ ॥ ૫॥

ભુવનજનની પુરારેઃ મહિષી ભૂષાયિતામૃતમયૂખા ।
કલિકલુષિતજનમેનં પાતુ સુધાકારમઞ્જુલાપાઙ્ગૈઃ ॥ ૬॥

નિખિલનિગમાન્તવેદ્યા વિદ્યા પરમા પુરારિસર્વસ્વમ્ ।
યમપાશભીતમેનં રક્ષતુ જનમેનમદ્રિપતિકન્યા ॥ ૭॥

ધુતપદનતજનપાપા પરચિદ્રૂપાપ્રેમયનિજરૂપા ।
શશિમૌલિભાગધેયં જયતિ નગેશાનકન્યકા માન્યા ॥ ૮॥

તવ ભૂધરેન્દ્રતનયે પાદાબ્જં નિગમદીર્ઘિકાફુલ્લમ્ ।
ઉત્તંસયન્તિ પુરુષા ધન્યાઃ કેચિત્ ત એવ સુરમાન્યાઃ ॥ ૯॥

શતમખનીલમણીનાં પ્રભયાચ્છુરિતા તવાક્ષિયુગલશ્રીઃ ।
તારકવિભેદિવાહં નૃત્તોન્મુખમાતનોતિ શરદિ પથિ ॥ ૧૦॥

કુવલયસમ્પત્પ્રદમિહ વિલોચનં માતરચલતનયે તે ।

મમ માનસં તુ ચન્દ્રં કલયતિ તાપપ્રશાન્તિદં સમયે ॥ ૧૧॥

નિજગતિજિતકાદમ્બામમ્બામમ્ભોજલોચનાં વન્દે ।
સમ્ભાવયતિ મહેશો યાં કિલ કાલેષુ હૃદ્યનવ્યરસૈઃ ॥ ૧૨॥

લલિતગુણરત્નભૂષાપેટી શુકમાન્યનૈજવાગ્ધાટી ।
આશ્રિતકદમ્બવાટી જયતિ પરાનન્દજાતપરિપાટી ॥ ૧૩॥

કુસુમશરવૈરિકાન્તા કાન્તાલકભારલલિતાફાલાન્તા ।
નિખિલનિગમાન્તસારા સા રજતિ શમ્ભુભાગ્યધારા હિ ॥ ૧૪॥

કરકમલકલિતચાપે પરમાનન્દૈકકન્દલે શમ્ભોઃ ।
કનકમણિલલિતકણ્ઠે ત્વામેવાહં ભજામિ પરવૃત્ત્યૈ ॥ ૧૫॥

ચિન્તિતફલદે પુંસાં પ્રબલતરામોદકન્દલે શમ્ભોઃ ।
પુણ્યાનાં પરિપાકં ત્વત્પદપદ્મં પ્રફુલ્લમિહ ચિત્તે ॥ ૧૬॥

નિજમૌલિલસનશશિકરવિલાસિધમ્મિલ્લકુવલયામોદૈઃ ।
તતમધુકરગીતીનાં દમ્ભાદમ્બ ત્વદીયવાગ્રક્ષા ॥ ૧૭॥

લલિતકુટિલાલકાન્તા કાન્તા શમ્ભોરમેયવિભવાન્તા ।
સમ્પદમિહ નસ્તનુતે કુલભૂધરનાથભાગ્યપરિણામઃ ॥ ૧૮॥

જનતાચિરતરવિરચિતસુચરિતપરિપાકરૂપમમરેડ્યમ્ ।
કુસુમશરવૈરિભાગ્યં લસતુ કલિક્ષોભહાનયે મનસિ ॥ ૧૯॥

વિનતાલિવિભવદા તે કટાક્ષધારા વિભાતિ લોકામ્બ ।
કુસુમશરશાસ્ત્રસિદ્ધિપ્રદા ગિરીશસ્ય યોગિહૃદ્દીપા ॥ ૨૦॥

નિત્યકુમારી કાલે કાપિ પયોજાસનાદિનુતિતુષ્ટા ।
શિતિકણ્ઠભાગ્યરક્ષાસૂત્રં તનુતે સ્વવૈભવૈર્હૃદ્યૈઃ ॥ ૨૧॥

નિખિલનિગમાન્તસારં યાવદ્રૂપં મદમ્બ પશ્યામિ ।
સા તુ નિયમિતદૂતગણો દૂરે યાત્યમિતકોપકોપકોઽપિ યમઃ ॥ ૨૨॥

શિવવામભાગભૂષા કાચિદ્ યોષા નતાલિકૃતભાષા ।
તાટઙ્કરત્નભૂષારુચિભરકાષાયિતાત્મમુખવેષા ॥ ૨૩॥

વાણીશવિનુતમહિમા પરમા ચ કલા સતાં સમારાધ્યા ।
હિમભૂધરવરકન્યા કૃતભૂસુરસૌખ્યસમ્પદારાન્મે ॥ ૨૪॥

શિથિલિતભવભીતિતતિં ભૂધરકન્યામહં સદોપાસ્યામ્ ।
આનન્દાદ્વૈતકલાં ભજે કલિક્ષોભહાનયે નિભૃતમ્ ॥ ૨૫॥

નવરત્નખચિતભૂષાતતિભાનીરાજિતાખિલાઙ્ગીં તામ્ ।
કામપિ કલામુપાસે સતતાનન્દૈકકન્દલીં જનનીમ્ ॥ ૨૬॥

મમ હૃદયકેલિભવને વિલસતિ તદ્રૂપમિષ્ટદં પુંસામ્ ।
યદિહાદરેણ શમ્ભુર્લોકત્રયરક્ષણાય ચકમે ચ ॥ ૨૭॥

ગઙ્ગાધરવરભૂષા ભઙ્ગાયાસ્માકમખિલદુરિતાનામ્ ।
શ‍ૃઙ્ગારસારવેષા તુઙ્ગાનન્દપ્રદાસ્તુ જગદમ્બા ॥ ૨૮॥

તેન વયં પરતન્ત્રાઃ યચ્છશિશેખરમનશ્વરૈશ્વર્યમ્ ।
શમ્ભોરિહ લોકાનાં ચિન્તામણિરાદિમઃ સુલભ્યશ્ચ ॥ ૨૯॥

નયનાઞ્જનકલિકેયં શમ્ભોરમ્ભોજલોચના ચપલા ।
શ્રુતિસુદતીસૂત્રકલા મમ હૃદિ ભવને વિકાસમુપયાતિ ॥ ૩૦॥

કુચકુમ્ભાઙ્કિતશમ્ભું કરપદ્માદૃતપયોજમણિમાલામ્ ।
નતજનભરણાસક્તામમ્બામમ્ભોજલોચનાં નૌમિ ॥ ૩૧॥

બાલમરાલીલીલાં બાલાં બલિવૈરિવાસવાદિનુતામ્ ।
જગદમ્બામાલમ્બાં નિબિડનિતમ્બાં હિતાર્થમવલમ્બે ॥ ૩૨॥

ધ્યાનૈર્વેદ્યં તત્ત્વં મીનધ્વજવૈરિમહિતભાગ્યં તત્ ।
ભૂધરકન્યારૂપં વિહરતિ મમ માનસે હતતમસ્કે ॥ ૩૩॥

મુનિજનમાન્યચરિત્રા નાનાદેશેષુ લસિતબહુપીઠા ।
સર્વસ્વસમ્પ્રદાયઃ શમ્ભોરમ્બા મમાઞ્જલિપ્રીતા ॥ ૩૪॥

વાચામગોચરં તત્ પુરાતનીનામપીહ નતસુલભમ્ ।
ગિરિજારૂપં તેજો ભાતુ ગિરીશાર્ધમાદરાદક્ષ્ણોઃ ॥ ૩૫॥

મન્દસ્મિતેન મધુરા મધુરાપીઠસ્થિતા ચ હરભાગ્યમ્ ।
શીતલનયનાસારૈઃ સિઞ્ચતિ મામઞ્જસા જગન્માતા ॥ ૩૬॥

ભાતિ પુરન્ધ્રી શમ્ભોરિહ પુરતોઽસ્માકમાત્તસુમબાણા ।
સુમબાણવૈરિચિત્તાકર્ષણકુલિકા ચ ચિન્મયી પરમા ॥ ૩૭॥

લોચનપાતે શીતા પાતા પાદામ્બુજાત્તચિત્તાનામ્ ।
શ્વેતા ચ મન્દહસિતે શ્વેતારણ્યસ્થિરપ્રદીપકલા ॥ ૩૮॥

પુરમથનમહિષિ ચિત્તે કુરુ પદવિન્યાસમાત્તકુતુકા ત્વમ્ ।
તેનૈવાહં ધન્યઃ કુરવૈ પુરવૈરિપાદપૂજાં ચ ॥ ૩૯॥

શતમખમુખસુરવન્દ્યે કાન્તાશ્લેષેણ પુલકિતાઙ્ગિ ત્વામ્ ।
મનસા સ્મરામિ દયસે તેનૈવાહં કલૌ યુગે ધન્યઃ ॥ ૪૦॥

પુરમથનસ્યાપિ વપુઃ પુનતીમમ્બાં નિજાક્રમણશક્ત્યા ।
ચિરપુણ્યદર્શનીયાં સ્મરામિ મનસા પરાં સુતામદ્રેઃ ॥ ૪૧॥

કુઙ્કુમકણલસિતાઙ્ગીં કુવલયદૃશમબ્જલોચનાં વન્દે ।
લોચનજિતસારઙ્ગીં ભવમહિષીમર્ધચન્દ્રશેખરિણીમ્ ॥ ૪૨॥

નાનાલીલાખેલાં હરરતિલોલાં હિતૈકપરિશીલામ્ ।
વન્દે બાલાં ભૂમિધરપતિકન્યાં સુરેશબહુમાન્યામ્ ॥ ૪૩॥

સરસિજમૃદુલપદાબ્જં પદાબ્જવિન્યાસધન્યભૂભાગમ્ ।
મનસિ નયને ચ વાચિ સ્ફુરતુ મહેશાનમાન્યસામ્રાજ્યમ્ ॥ ૪૪॥

શમ્ભોઃ કુટુમ્બિની સા મધુકરમાલાલસત્સ્વધમ્મિલ્લા ।
સૌભાગ્યદા સદા મે લસતુ કૃપાપૂરલાલિતાપાઙ્ગા ॥ ૪૫॥

ઊરીકૃતપુરમથના દૂરીકૃતદુષ્ટરાક્ષસાદિગણા ।
નારી પરમા સૈષા ભેરીભાસ્વત્કરોરુહા ભાતિ ॥ ૪૬॥

નિખિલોપનિષદ્વિદ્યાસારં સંસારબન્ધમોહહરમ્ ।
હરમાન્યં તત્ તેજો ભાતિ સુરેશાદિરક્ષણોપાયમ્ ॥ ૪૭॥

શમ્ભોરુત્સવધારા નવનવહારા સમાશ્રિતાધારા ।
સંવિદ્રૂપારૂપા કોપાર્દિતદુર્જના ચ સા જયતિ ॥ ૪૮॥

પુણ્યસમુદાયસરણિં પુરહૂતમુખૈરભિષ્ટુતામમ્બામ્ ।
ભજ માનસ ભો નિત્યં નિત્યાનન્દાદ્વયાત્મિકાં દેવીમ્ ॥ ૪૯॥

જીવિતસર્વસ્વમિદં શમ્ભોરમ્ભોજલોચનં રત્નમ્ ।
યચ્ચિન્તનેન ધન્યા વૈમાનિકવન્યકલિતવિશ્રામાઃ ॥ ૫૦॥

અન્તસ્તમોનિહન્ત્રી સંધ્યાપૂર્વા વિભાતિ ગિરિતનયા ।
ઉદયે યસ્યા વિદુષાં વિલસન્તિ કરામ્બુજાનિ નક્તમપિ ॥ ૫૧॥

કુલગિરિનાથનૂજે લોકામ્બ ત્વત્પદામ્બુજં જન્તુઃ ।

ભક્ત્યા સ્મરતિ હૃદિ સ્વે તત્પદયુગલં વહન્તિ શિરસાન્યે ॥ ૫૨॥

મહિષાસુરમર્દનિ તે ભીમં રૂપં તદસ્તુ રિપુનેત્રે ।
સાદરકટાક્ષાપાતં પુરતો મમ ભાતુ સૌમ્યરૂપં તે ॥ ૫૩॥

આદૃતશુકાદિવાણી વાણીશસુરેશહરિમુખૈઃ સ્તુત્યા ।
સુમલસિતમૃદુલવેણી વિલસતિ કૈલાસપીઠિકામધ્યે ॥ ૫૪॥

દયમાનમાનસં તત્ સ્મયમાનમુખં નિરીક્ષ્ય તત્તેજઃ ।
નિયમાદિવિધુતપાપા વયમાનન્દાશ્રુઝરપરીતાઙ્ગાઃ ॥ ૫૫॥

લલિતગતિં સુરવિનુતિં લસિતમતિં કિઞ્ચ યતિમનોજુષ્ટામ્ ।
તવ મૂર્તિમમ્બ પાર્વતિ કદા નુ પશ્યન્ નયામિ કલિકાલમ્ ॥ ૫૬॥

કુરુતે મનસિ મદીયે વિહારલીલાં નગેન્દ્રવરકન્યા ।
તાવદ્ વિલસતિ ચિન્મયતત્ત્વં તત્ત્વાર્થિભિઃ સમારાધ્યમ્ ॥ ૫૭॥

શઙ્કરમિશ્રિતદેહં શ્રુતિસુદતીમૌલિભૂષણં તેજઃ ।
મુખજિતચન્દ્રં તન્મે પ્રસીદતુ ક્ષિપ્રનમ્રપાપહરમ્ ॥ ૫૮॥

વિધુમૌલિવિભ્રમશ્રીર્વિદ્રુમરુચિસોદરાત્મતનુકાન્તિઃ ।
સિઞ્ચત્યમૃતમિહાક્ષ્ણોશ્ચિરપુણ્યવશાદિહાસેવ્યમ્ ॥ ૫૯॥

પરકૈવલ્યાનન્દપ્રાપ્તિસ્તેષાં ધ્રુવં હિ તનુભજામ્ ।
યેષાં ચિત્તે વિત્તાધિપમુખસેવ્યા વિહારભાગ્ ગૌરી ॥ ૬૦॥

ગૌરિ તવ પાદપદ્મં શશધરકલયાઙ્કિતાત્મમૌલિતલે ।
મમ ચાન્તિમપ્રયાણે વિલસતુ નેત્રે સ્મૃતૌ ચ હૃદિ વાચિ ॥ ૬૧॥

શઙ્કરસુકૃતસમૂહા કિઙ્કરદેવાદિરઙ્કુવીણા ચ ।
શઙ્કાદિમોહહન્ત્રી લસતુ મમાક્ષ્ણોઃ શશાઙ્કમૌલિતલા ॥ ૬૨॥

કુચકુમ્ભાશ્લેષવશાદાહૃતહરચિત્તવૃત્તિરમરાણામ્ ।
મનુજાનામપિ નિત્યં દૈવતમેષા ચકાસ્તિ ગિરિકન્યા ॥ ૬૩॥

પરિતુષ્ટા હરભજને નિજગલકલગીતિવિજિતપરપુષ્ટા ।
સૂચિતસુરરિપુકષ્ટા પરમકલત્રં હરસ્ય તજ્જયતિ ॥ ૬૪॥

સતતાલોલિતદયયા દૃશામ્બ માં પશ્ય સરસિજાતરુચા ।
પરમશિવે નિર્વૃત્તિમહમવાપ્ય તેનૈવ તાવકો ભક્તઃ ॥ ૬૫॥

સરસકવિતા ચ સમ્પચ્ચાક્ષોભ્યં મણ્ડલાધિપત્યં ચ ।
નનુ જાયતે નૃણાં કિલ તવ વીક્ષાવૈભવેન ભવકાન્તે ॥ ૬૬॥

ત્વન્મૌલિચન્દ્રવિસૃમરકરધારાભિઃ કૃતાભિષેકા ત્વમ્ ।
દ્વિગુણિતદયાર્દ્રહૃદયા પરિપુષ્યસિ મઙ્ગલાનિ ભક્તાનામ્ ॥ ૬૭॥

ગૌરિ નગાધિપતનયે શશિશેખરદિવ્યમહિષિ માં પાહિ ।
ઇતિ કિલ કલિતાઞ્જલયઃ સેવન્તે સુરનરાદયો નિત્યમ્ ॥ ૬૮॥

પરમેશ્વરદયિતે ત્વત્પદપદ્મયુગાર્ચનારતાઃ સન્તઃ ।
કલયન્તિ ગાઙ્ગસલિલં પુષ્પાણ્યપિ ભક્તિભારસમ્પન્નાઃ ॥ ૬૯॥

શૃઙ્ગારાગમસારા તવ લીલા જયતિ ચેતસિ ભવસ્ય ।
અત એવ સ્વાઙ્ગે ત્વામારોપયદાશુ વિજિતકામોઽપિ ॥ ૭૦॥

નનુ માતરમ્બ મન્દસ્મિતલીલાદિકમુદીક્ષ્ય શશિમૌલિઃ ।
વિરહાસહિષ્ણુરનિશં વહતિ ત્વાં નૈજવપુષિ સાનન્દમ્ ॥ ૭૧॥

તવ શઙ્કરિ ભૂષોરગલસદુરુમણિદમ્ભતઃ શિવઃ કાલે ।
નીરાજનમાતનુતે ભક્તહિતાર્થી સુમઙ્ગલાવાપ્ત્યૈ ॥ ૭૨॥

તવ પાદભક્તિરમ્બ ક્ષિતિધરતનયે તનોતિ કવિસૂક્તિમ્ ।
અમરશ્રિયમથ સહસા ધરાધિપત્યાદિકં નૃણામ્ ॥ ૭૩॥

આલોકનેન માતસ્તવ મનુજાનાં હૃદિ સ્થિતં ચ તમઃ ।
ગલતિ હઠાત્ પાપાલિઃ સહસામરલોકસમ્પદાભાતિ ॥ ૭૪॥

યઃ સૂક્તિમાલિકાભિસ્તવ પાદયુગં સમર્ચયતિ જન્તુઃ ।
તત્પદયુગ્મં તુ સુરાઃ કલ્પમહીરુહસુમૈશ્ચ ગાઙ્ગજલૈઃ ॥ ૭૫॥

પાર્વતિ તવ મુખકમલાલોકનતો ગલિતસંશયાઃ સન્તઃ ।
કૈવલ્યરૂપકન્દલમાસાદ્ય વિધાનતો જના ભાન્તિ ॥ ૭૬॥

નન્વદ્રિસુતે મન્દસ્મિતકાન્તિમિષાત્ ત્વદીયકીર્તિઝરી ।
દિક્સૌધાગ્ચલભાગે વિલસતિ નતરક્ષણોત્થિતા જગતિ ॥ ૭૭॥

કરણવિહીનાન્ મૂઢાન્ નરાન્ સુરાન્ પાસિ યોગિનોઽપિ તથા ।
લોકામ્બ ભાવનાદ્યૈઃ કાલે કાલે નગેન્દ્રતનયે ત્વમ્ ॥ ૭૮॥

નગરાજવંશસમ્પદ્ દિવ્યા કાચિદ્ વિભાતિ હરમાન્યા ।
ગણપતિમયૂરવાહૌ યત્તનયૌ લોકસમ્પદે જયતઃ ॥ ૭૯॥

પ્રતિદિનકલિતામેનામઞ્જલિકલિકામગાધિપતનૂજે ।
અઙ્ગીકુરુષ્વ દયયા તેનૈવ વયં કૃતાર્થાઃ સ્મઃ ॥ ૮૦॥

કલ્યાણકેલિભાજનમિહ શર્વસ્યાપ્રેમયતુષ્ટિકલા ।
ચન્દ્રકલાવિલસિતનિજમૌલિતલા ભાતુ માનસે કાપિ ॥ ૮૧॥

વિનતજનબન્ધહારિણિ કલ્યાણિ પુરારિસુકૃતપરિપાકે ।
બધ્નીમો વયમઞ્જલિમનુદિનમમિતાત્મચિત્સુખાવાસ્યૈ ॥ ૮૨॥

કંદર્પાગમસારા લસદુરુહારા ચ મઙ્ગલાકારા ।
તારાધિપવાસલસન્મૌલિતલા ભાતુ માનસે દેવી ॥ ૮૩॥

નતહંસાવલિરેષા ગતિજિતહંસાવલી ચ ગિરિતનયા ।
શિશિરીકરોતિ લોચનમાલામાલાપવિજિતશુકવાણી ॥ ૮૪॥

શુકવાણીસદૃશીયં મમ વાણી હરકુટુમ્બિનીનિકટમ્ ।
ન ખલુ કરોતિ પ્રાપ્તા મુદમસ્યા મધુરમન્દહાસજુષઃ ॥ ૮૫॥

શશિશકલકલિતમૌલિસ્ત્રિલોચના કુઙ્કુમચ્છાયા ।
પાતિ જનની જનાનાં કિંનરયક્ષાદિગેયમાહાત્મ્યા ॥ ૮૬॥

નિજતનુતેજઃપ્રસરૈરિન્દુકલોત્તંસલસિતમૌલિતલા ।
પૂરયતિ લોકમાતા ત્રિભુવનમિદમાત્તકૌતુકા પીઠે ॥ ૮૭॥

તવ માતરઙ્ઘ્રિસરસિજભક્તિવિશેષાત્તવૈભવા હિ નરાઃ ।
વૈમાનિકપદવીષ્વપ્યાશારહિતા વિશન્તિ તે ધામ ॥ ૮૮॥

તવ હારમણિપ્રભયા પાર્શ્વસ્થિતશમ્ભુચન્દ્રમૌલિકલા ।
સમ્પ્રાપ્તપૂર્ણમણ્ડલશોભા સતતં વિરાજતે માતઃ ॥ ૮૯॥

અર્ધાઙ્ગશમ્ભુભૂષણફણામણિપ્રચુરકાન્તિવીચીભિઃ ।
તવ હસ્તહરિણપોતઃ શશ્વદ્ ધાવતિ નવીનતૃણબુદ્ધ્યા ॥ ૯૦॥

નાથકલાનુગુણં તે રૂપં જગદમ્બ સર્વબુધવન્દ્યમ્ ।
પર્વતરાજસુતે નઃ શ્રેયઃશ્રેણ્યૈ તદસ્તુ કલિતદયમ્ ॥ ૯૧॥

કૈરાતો વેષો વા ભિક્ષાટનરૂપમન્યદપિ શમ્ભોઃ ।
સર્વં તત્ ત્વત્કલયા લસિતં ભાત્યત્ર ભૂધરેન્દ્રસુતે ॥ ૯૨॥

ત્રિપુરવિજયશ્ચ માતસ્ત્વત્કોપાદરિષુ ચન્દ્રમૌલેસ્તુ ।

આસીત્ સુલભકલઃ કિલ તે કીર્તિઃ કીર્તિતા દિશાં વલયે ॥ ૯૩॥

તવ પાદામ્બુજસેવાદરેણ માતસ્તવ સ્તુત્યામ્ ।
યૈઃ કલિતા મતિરેષાં ચરણૌ પૂજ્યૌ હિ નાકિનાં વૃન્દૈઃ ॥ ૯૪॥

તવ પાદભક્તિભૂમ્ના પાણ્ડિત્યં સર્વસંમાન્યમ્ ।
કીર્તિં ચ સુખં લભતે ભક્તસ્તે માતરચલસુતે ॥ ૯૫॥

પરિફુલ્લકમલસુષમાસંમાન્યૈસ્તે કટાક્ષૈર્યઃ ।
ભાત્યઙ્કિતો ધરણ્યાં સ તુ ધનદો વા મહેન્દ્રો વા ॥ ૯૬॥

કમલાક્ષમુખૈર્દેવૈઃ ફક્કૃતગીર્ભિસ્તવ સ્તુતૌ માતઃ ।
કથમમ્બ માનુષોઽહં સ્તોતું ત્વાં શક્નુયાં મન્દઃ ॥ ૯૭॥

તવ પાદપદ્મભક્તિર્ધરણિધરેન્દ્રસ્ય કન્યકે કાલે ।
વાચાલીકુરુતે  માં મન્દમપિ સ્તોતુમાદરાજ્જનનિ ॥ ૯૮॥

જનનિ વિના પુણ્યાનાં ખણ્ડં ત્વામીક્ષિતું નયનૈઃ ।
શક્તા નૈવ હિ મનુજાસ્તે રૂપં તત્ પરં જયતિ ॥ ૯૯॥

નાકિનગરામ્બુજાક્ષીનિટિલસુમામોદવાસિતં માતઃ ।
તવ ચરણપઙ્કજં મે કૃન્તતિ મોહાદિકં હૃદયે ॥ ૧૦૦॥

પરમેશ્વરસ્ય દયિતાપાદપયોજાતપાંસવો ધન્યાઃ ।
કૃતપુણ્યાનાં મૂર્તિષુ ભાસન્તે સર્વશુદ્ધયે હ્યેતે ॥ ૧૦૧॥

તવ પાદજલજરેણુસ્પર્શનસઞ્જાતવૈભવા મનુજાઃ ।
ધિક્કૃતનાકેશપદાસ્તવ સારૂપ્યાદિસમ્પદુલ્લસિતાઃ ॥ ૧૦૨॥

જનનિ તવાલકરત્નપ્રભાપ્રરોહૈર્ગિરીશશિરસિ કલા ।
ચાન્દ્રમસી સા ભજતે જપાપ્રભાલેપનં રમ્યમ્ ॥ ૧૦૩॥

કાઞ્ચ્યાં વા કૈલાસે મેરૌ વા ભક્તમાનસામ્ભોજે ।
પરમશિવવામભાગે રાજતિ કાલેઽમ્બિકા ખ્યાતા ॥ ૧૦૪॥

ધ્યાનપરીવાહાઙ્કુરકલિતં તે કુસુમકોમલં હિ વપુઃ ।
યોગિહૃદયામ્બુજાન્તર્જનનિ વિભાતિ સ્ફુટાકારમ્ ॥ ૧૦૫॥

યેષામઞ્જલિકલિકાલસિતં કરયુગમિદં કાલે ।
ન પ્રેરયતિ કૃતાન્તો નિજદૂતાન્ તેષુ તે પરં ગુરવઃ ॥ ૧૦૬॥

કારુણ્યાકુલિતહૃદા તયામ્બયા ભક્તપાપાલિઃ ।
ન હિ ગણ્યતે ગિરીશોઽપ્યસ્મિન્ સતતં કૃતપ્રસાદશ્ચ ॥ ૧૦૭॥

જગતઃ પિતરાવેતૌ રક્ષાહેતોર્નિજાઙ્ઘ્રિભક્તાનામ્ ।
રાજત ઇહ બહુરૂપૌ જનદૃક્દૃશ્યૌ ચ દેવવન્દ્યૌ ચ ॥ ૧૦૮॥

સા ભગવતી પુરસ્તાદાસ્તાં નઃ શાઙ્કરી જનની ।
યદ્વીક્ષાલવહીનાઃ પીડ્યન્તે તપ્તગાત્રાશ્ચ ॥ ૧૦૯॥

જાતપરાક્રમકલિકા દિશિ દિશિ કિંનરસુગીતનિજયશસઃ ।
ધન્યા ભાન્તિ હિ મનુજા યદ્વીક્ષાલવવિશેષતઃ કાલે ॥ ૧૧૦॥

વાચાં સનાતનીનાં વિશ્રાન્તિસ્થાનકં હિ યત્ સ્થાનમ્ ।
કરુણાપાલિતલોકત્રિતયં તદ્ ભાતિ સુકૃતિહૃદયતટે ॥ ૧૧૧॥

શ્રુતિમૌલિભૂષણં તે પદારવિન્દં જનઃ કાલે ।
ભક્ત્યા પ્રણમ્ય બહુજનનગરે સિંહાસને લસતિ ॥ ૧૧૨॥

શ્યામા ચન્દ્રકલોજ્જ્વલમૌલિરિયં શાઙ્કરી કાલે ।
ધ્યાનજપાદૌ પુણ્યાત્મનાં હૃદિ પ્રસ્ફુરત્યમલે ॥ ૧૧૩॥

ત્રિભુવનરક્ષાહેતોરઙ્ગીકૃતગિરિશદેહયષ્ટિરિયમ્ ।
રાજતિ રાજતપીઠે ત્રિભુવનસુન્દરરુચાત્તબહુકોણે ॥ ૧૧૪॥

નિશ્ચલદીપકલા સા રક્ષિતમરુદૌષ્ણ્યહીનનિજરૂપા ।
શૂલિસ્નેહોલ્લસિતા જનહૃત્તમસાં નિહન્ત્રી ચ ॥ ૧૧૫॥

નિગમાન્તમધ્યવીથીમહામણિઃ સર્વમૂલ્યા ચ ।
ભક્તિક્રયા ચ કાલે કેયૂરમણિશ્ચ શૂલિનો જયતિ ॥ ૧૧૬॥

કલ્યાણસંતતેર્યા કલિતા જન્મસ્થલીતિ વિબુધેશૈઃ ।
નઃ કલ્યાણાય સ્યાત્ સા ગૌરી મેદુરા દયયા ॥ ૧૧૭॥

તવ કેશકાન્તિવિસરૈ રાહોઃ શઙ્કા શિરઃસ્થેન્દોઃ ।
ગ્રસનાદિદૈન્યહારિપ્રભાવમાલોચ્ય તે સૌમ્યઃ ॥ ૧૧૮॥

મન્દસ્મિતરુચિભરિતે પુરઃસ્થલે તેઽર્ચનાહેતોઃ ।
ન્યસ્તાનિ હિ પુષ્પાણિ ભ્રમરાક્ષેપાત્ સ્ફુટં ભાન્તિ ॥ ૧૧૯॥

ક્ષીરસહોદરમન્દસ્મિતરુચિનિરસિતનતાલિહૃત્તિમિરા ।
સા જયતિ શાઙ્કરી કિલ શઙ્કરસંસ્તૂયમાનવિભવા ચ ॥ ૧૨૦॥

મન્દાનામપિ મઞ્જુલકવિત્વરસદાયિની જનની ।
કાપિ કરુણામયી સા લસતુ પુરસ્તાત્ સદાસ્માકમ્ ॥ ૧૨૧॥

તાપહરસવિવર્ષણકૃતકુતુકા કાપિ નીલનલિનરુચિઃ ।
કાદમ્બિની પુરસ્તાદાસ્તાં નઃ સંતતં જનની ॥ ૧૨૨॥

કરુણાકટાક્ષલહરી કામાયાસ્તુ પ્રકામકૃતરક્ષા ।
ગૌર્યા ગિરિપતિમાન્યા સત્સુખદાને ભૃશં ખ્યાતા ॥ ૧૨૩॥

ઐક્યમનીયત નિતરાં યદાદરેણેન્દુમૌલિના પૂર્વમ્ ।
તત્ તેજો હૃદિ લસતુ સ્થિરે ચ નિષ્કલ્મષેઽસ્માકમ્ ॥ ૧૨૪॥

યત્પદરેખા માન્યા લેખાદીનાં શુભોદયે નિભૃતમ્ ।
સા લોચને પુરસ્તાદાસ્તાં નઃ શશિકલોલ્લસન્મૌલિઃ ॥ ૧૨૫॥

યસ્યાવિર્ભાવવશાન્માન્યોઽભૂદ્ ભૂધરેન્દ્રોઽપિ ।
તત્ પાર્વતીતિ સંજ્ઞં ગૌરી દાક્ષાયણી ચ લોકામ્બા ॥ ૧૨૬॥

મારારાતિમનોહરલાવણ્યા કુસુમમૃદુશરીરેયમ્ ।
નિજકરુણાપાઙ્ગસુધાપૂરણકૃતવૈભવા ભાતિ ॥ ૧૨૭॥

ધનધાન્યકીર્તિકવિતાલલનાસુતહર્મ્યમુખ્યકામપરૈઃ ।
તૈર્નૂનમર્ચિતાચલસુતાઙ્ઘ્રિજલજૈસ્તથાભૂતૈઃ ॥ ૧૨૮॥

ગિરિશ્શરીરવિહારિ ત્રાતજગત્ તત્ પરં જ્યોતિઃ ।
શારદસરસિજનયનં મમ ગૌરીરૂપમાવિરસ્તુ હૃદિ ॥ ૧૨૯॥

અચલસુતયા સનાથા વયમેતે ધૂતપાપકલાઃ ।
શશિશિખરં ચર્મધરં ગઙ્ગાધરમીક્ષ્ય મોદન્તે ॥ ૧૩૦॥

પ્રૌઢાન્ધકારનિરસનચણમેતત્ પાર્વતીરૂપમ્ ।
પરમં જ્યોતિર્લસતિ સ્ફુટં ચ સદ્ગુણસમાવૃતં હૃદયે ॥ ૧૩૧॥

દહરાકાશવિહારિ જ્યોત્સ્નાલસદુત્તમાઙ્ગમિદમાદ્યમ્ ।
ચિન્તારત્નં ગિરિશપ્રકામભાગ્યં ચ લોકદીપકલા ॥ ૧૩૨॥

પુણ્યાઙ્કુરવૃદ્ધિકરં ગૌરીરૂપં સદા ધ્યાયે ।
યચ્છિવનેત્રમહોત્સવનિભૃતં રક્ષિતજગત્ત્રિતયમ્ ॥ ૧૩૩॥

સૂર્યસુતાકલ્લોલોલ્લલનદશારમ્યનેત્રલહરીભિઃ ।

શ્રેયઃસંતતિમચિરાત્ તરઙ્ગયતિ નઃ સદા દેવી ॥ ૧૩૪॥

ભૂધરકન્યા સેયં સાદરદત્તાર્હણાદિબહુતોષા ।
વાદરસવિજયદાઃ નઃ પાદરસાસક્તકલિતબહુભાષા ॥ ૧૩૫॥

પ્રૌઢતમાલવનાલીરુચિભરકમનીયનેત્રવિસ્ફારૈઃ ।
દિશિ દિશિ કલિતા સમ્પદ્ યયા તયા નઃ કુલં જયતિ ॥ ૧૩૬॥

નિજતારુણ્યવિહારૈર્મોહકરં શૂલિનોઽપિ યત્ તેજઃ ।
તત્ કુમુદિનીશખણ્ડસ્ફુરચ્છિરઃકરલસદ્ધનુર્વર્યમ્ ॥ ૧૩૭॥

શઙ્કરપુણ્યાઙ્કુરકૃતરૂપં પાથોજનયનં ચ ।
પૃથુજઘનકુચયુગં ચ ત્રાતજગત્ દગ્ધદૈત્યચયમ્ ॥ ૧૩૮॥

નીલનલિનીસુમાલીલલિતકચં શઙ્કરાર્હલલિતકુચમ્ ।
કૈલાસપીઠમધ્યે ભાતિ સદા ધ્યેયમારાધ્યમ્ ॥ ૧૩૯॥

સ્મરણદશયાપિ કાપિ પ્રદીપિકા નાશિની તમસામ્ ।
નિગમતતિસૌધવલભીપ્રકાશિની નિત્યતેજસ્કા ॥ ૧૪૦॥

પુરારિપુવામાઙ્કતલોદ્ભાસિતગાત્રં મહઃ કિમપિ ।
હૃદિ લસતુ સંતતં મે નિરસ્તસંસૃતિતમોરાશિ ॥ ૧૪૧॥

નિગમાન્તમધ્યપઞ્જરશુકી શુકાદ્યૈઃ સમારાધ્યા ।
કરધૃતપુણ્ડ્રેક્ષુકલા શ્રેયઃસંતાનદાયિની નમતામ્ ॥ ૧૪૨॥

તવ પાદપદ્મશોભાચ્છુરિતં પુરતઃ સ્થલં ગૌર્યાઃ ।
કૃતપલ્લવસંસ્તરણં મત્વા તૂષ્ણીં બભૂવ તે દાસઃ ॥ ૧૪૩॥

નવજલધરનીલરુચા સંમાન્યૈસ્તે કટાક્ષકાન્તિભરૈઃ ।
સઙ્કુલિતનિત્યતોરણશોભં તે મણ્ટપાસ્થાનમ્ ॥ ૧૪૪॥

રાકાચન્દ્રનિભાસ્યા સા કાશ્યાદિષુ કૃતાત્મબહુપીઠા ।
નાકાદિરાજવિનુતા શોકાદિહરપ્રભાવજન્મકલા ॥ ૧૪૫॥

પારાવારસુતાદ્યૈરારાત્કલનીયનૈજવિભવા સા ।
વીરાઢ્યનૈજરૂપા દારાઃ કૈલાસવાસિનો જયતિ ॥ ૧૪૬॥

ધીરાત્મહૃદયકમલે ધારાધરનીલચિકુરભારવતી ।
ક્ષીરાદિહૃદ્યવાણી ધારા સા ભાતિ પાર્વતીરૂપા ॥ ૧૪૭॥

પરમશિવભાગ્યધાટી કાઞ્ચનશાટી મમાસ્તુ હૃદિ સતતમ્ ।
પરિમલિતવક્ત્રવીટી કૃતનતિઘોટી ગજાદિપરિપાટી ॥ ૧૪૮॥

સન્માનસકાસારે કૃતપરમાનન્દસંતતિર્જનની ।
શઙ્કરતત્ત્વોન્મેષં કલ્યતિ કાલે દયાસારાત્ ॥ ૧૪૯॥

એણાઙ્કુલસિતમૌલિઃ ક્ષીણાનાં રક્ષિણી પરમા ।
પાણાવાદૃતહરિણા વીણાનુતિલાલિતા ચ સા જયતિ ॥ ૧૫૦॥

મૂકાદીનાં પુરહરમૌલ્યાન્દોલનકરોજ્જ્વલા વાચઃ ।
યત્કારુણ્યાત્ કાલે સમુલ્લસન્તીહ સા મદીયધનમ્ ॥ ૧૫૧॥

સર્વેષાં દેવાનામપિ મર્ત્યાનાં તથા ગિરીશસ્ય ।
એકા પુણ્યશ્રેણી ગૌરીરૂપા હિ સર્વદા જયતિ ॥ ૧૫૨॥

પશુપતિપુણ્યશ્રેણીપરિપાકં પાર્વતીરૂપમ્ ।
નિજદૃગ્રક્ષિતલોકત્રયમિદમારાદ્ વિરાજતે તેજઃ ॥ ૧૫૩॥

શીતલભૂધરજનિતા દયયા ચ પુનસ્તથા શીતા ।
શીતલલલયકટાક્ષા સા જનની નઃ સદા જયતિ ॥ ૧૫૪॥

સ્મૃતિમાત્રતાપહાન્યૈ કલિતમાનાં જનાનાં સા ।
કૃતસઙ્કલ્પાનલ્પાભરણા ભરણાય હૃદિ લસતિ ॥ ૧૫૫॥

સુકૃતિજનદૃશ્યરૂપં દુષ્કૃતિજનદૂરગં ચ તત્ તેજઃ ।
કારુણ્યપૂર્ણહૃદયં તદ્ભાવનતાં તથા જયતિ ॥ ૧૫૬॥

તાપિઞ્છસ્તબકરુચિર્જનની સા શાઙ્કરી ભજતામ્ ।
નિજદૃક્પાતપ્રશમિતદારિદ્ર્યાદિર્લસતિ પીઠે ॥ ૧૫૭॥

પરમશિવાસ્થાનતલે નિત્યં ખેલનકૃતાદરં તેજઃ
તદ્ રાજતે મુનીનાં હૃદયે નિગમાન્તસૌધે ચ ॥ ૧૫૮॥

નિશ્ચલભાવભૃતાં તન્નિશ્ચલરૂપં વિરાજતે તેજઃ ।
હંસીવ માનસે મે મઞ્જુલગતિદાયિની સુદૃશામ્ ॥ ૧૫૯॥

માધુર્યં વચસિ ગતૌ ગામ્ભીર્યં નેત્રયોસ્તૈક્ષ્ણ્યમ્ ।
શૈતલ્યં હૃદિ ચ સદા યત્ર હિ દૃશ્યં તદેવ જનની નઃ ॥ ૧૬૦॥

નિજશોભાજિતકન્દુકકુચયુગલશ્રીજિતેશહૃદયા સા ।
મનસિ મમ સંનિધત્તાં દત્તાત્રેયાદિભિર્વન્દ્યા ॥ ૧૬૧॥

નિજમૌલિચન્દ્રકિરણપ્રસારણેઽપ્યુલ્લસત્સરોજયુગમ્ ।
દધતી શ્રવસોરેષા ચકાસ્તિ હૃદયે પરા દેવી ॥ ૧૬૨॥

મુખજિતતારાનાથા મખભુગ્ગણસેવ્યચરણજલજાતા ।
નખકાન્તિપટલદમ્ભાદ્ ગતિજિતહંસાવલી વિભાતુ હૃદિ ॥ ૧૬૩॥

કવિતાભાગ્યવિધાત્રી પરિમલસઙ્ક્રાન્તમધુપગણકેશા ।
મમ નયનયોઃ કદા વા કર્ણેજપલોચનં દિવ્યમ્ ॥ ૧૬૪॥

શશિખણ્ડવતંસશ્રીઃ પશુપતિભાગ્યં ચ તત્ તેજઃ ।
મમ નયનયોઃ કદા વા કર્ણેજપલોચનં દિવ્યમ્ ॥ ૧૬૫॥

તત્ તેજઃ શાશ્વતમિહ સામાન્યં ભૂનિવાસકૃતામ્ ।
દ્યુસદામપિ જયતિ કૃતાદરં તદસ્તુ શ્રિયૈ કાલે ॥ ૧૬૬॥

શતમખનીલમણીનાં પ્રભાવિસારપ્રલોભતનુકાન્ત્યા ।
શ્રુતિમૌલિસૌધદીપશ્રિયા તયા નાથવાનહં કાલે ॥ ૧૬૭॥

કવિકુલસૂક્તિશ્રેણીશ્રવણાનન્દોલ્લસદ્વતંસસુમા ।
સા દેવી મમ હૃદયે કૃતસાંનિધ્યા કૃતત્રાણા ॥ ૧૬૮॥

પુષ્પેષ્વાગમસારા પુરભિન્માનસવિભેદિનિજકેલિઃ ।
વિશ્વવિમોહનમૂર્તિઃ સા દેવી શાઙ્કરી જયતિ ॥ ૧૬૯॥

કાશીકાઞ્ચ્યાદિતટસ્થિરાસના મેખલાભિરામકટિઃ ।
મુગ્ધસ્મેરમુખી સા યા ગૌરી સમ્પદાં જનની ॥ ૧૭૦॥

મુખવિજિતચન્દ્રમણ્ડલમિદમમ્ભોરુહવિલોચનં તેજઃ ।
ધ્યાને જપે ચ જપતાં ચકાસ્તિ હૃદયે કવીશ્વરાણાં ચ ॥ ૧૭૧॥

મઞ્જુલકવિતાસંતતિબીજાઙ્કુરદાયિની રસાલોકા ।
જનનિ તવાપાઙ્ગશ્રીર્જયતિ જગત્રાણકલિતદીક્ષેયમ્ ॥ ૧૭૨॥

અમ્બ તવાપાઙ્ગશ્રીરપાઙ્ગકેલીશતાનિ જનયન્તી ।
પુરહન્તુર્હૃદિ જયતિ વ્રીડામદમોહકામસારકરી ॥ ૧૭૩॥

દિનકરસુતાતરઙ્ગાવલિશોભાકૃતકચાકચિશ્રીશ્ચ ।
શશિખણ્ડવતંસશિરાઃ સા દેવી શરણમર્થિનાં પરમમ્ ॥ ૧૭૪॥

કલકલનિનદત્કાઞ્ચી કાઞ્ચ્યાદિતલસ્થિરાસના દેવી ।

પુરહરભૂષણમૂર્તિઃ સા દેવી શરણમસ્માકમ્ ॥ ૧૭૫॥

પુરહરસહધર્મચરીં કચભારલસન્નિશીથિનીશકલામ્ ।
કવિકુલમાન્યચરિત્રાં પવિત્રિતક્ષોણિભૃત્કુલાં વન્દે ॥ ૧૭૬॥

ભક્તજનાવલિકથિતસ્તુતિશતદત્તાદરામિમાં દેવીમ્ ।
સરસકવનપ્રદાત્રીં ભૂષિતશિવવામભાગરેખાન્તામ્ ॥ ૧૭૭॥

મઙ્ગલમૂર્તિં કિંનરકીર્તિતનિજકીર્તિવલ્લરીં જનનીમ્ ।
મૂર્તિમતીં કામકલાં શમ્ભોરમ્ભોજલોચનાં નૌમિ ॥ ૧૭૮॥

જિતમન્મથમારકલાદાત્રીં શિવગાત્રદિવ્યભૂષાં તામ્ ।
ત્રિજગત્સુખજનયિત્રીમમ્બામમ્બુદમનોજ્ઞતનુમૂર્તિમ્ ॥ ૧૭૯॥

ખણ્ડિતસુરવૈરિગણાં ચણ્ડકરાદ્યૈઃ સુરૈશ્ચ નુતસદનામ્ ।
મણ્ડિતપુરહરદેહાં તાણ્ડવિનઃ સર્વમઙ્ગલાં દેવીમ્ ॥ ૧૮૦॥

નિજલોચનકૃતસમ્પદમજકમલેક્ષણશચીશસુરવન્દ્યામ્ ।
ભજનકૃદન્તર્જ્યોતિષમજતનયાદ્યૈશ્ચ નિત્યસેવ્યકલામ્ ॥ ૧૮૧॥

ભરિતભુવનામપર્ણાં સરિદુરુવીચીવિલોલિતાત્મકચામ્ ।
ગિરિશકૃતનિત્યલીલાં વરિવસ્યાદાનતુષ્ટનિજહૃદયામ્ ॥ ૧૮૨॥

જનનુતનિત્યવિભૂતિં કનદુરુભૂષાવલીલસિતદેહામ્ ।
મનસાપ્યગણ્યતત્ત્વાં વનવાસિધ્યાનગોચરાત્મકલામ્ ॥ ૧૮૩॥

નીલામ્બુજકાન્તિમુષં બાલાર્કનિભાત્મકર્ણપૂરવતીમ્ ।
માલાલઙ્કૃતકણ્ઠાં બાલાં સ્કન્દસ્ય માતરં વન્દે ॥ ૧૮૪॥

શરણાગતજનરક્ષણકૃતદીક્ષાવીક્ષણેન જિતશમ્ભુઃ ।
કુલભૂધરવરતપસાં પરિપાકઃ કોऽપિ વિજયતે લોકે ॥ ૧૮૫॥

કુસુમશરમથનમનસાપ્યાદરણીયાત્મકામકેલિરિયમ્ ।
જનની કલ્યાણતતિં ભજતાં નઃ સાદરાત્ તરઙ્ગયતિ ॥ ૧૮૬॥

મત્તગજમાન્યગમના મધુરાલાપા ચ માન્યચરિતા સા ।
મન્દસ્મેરમુખાબ્જા ગૌરી મમ હૃદયસારસે લસતુ ॥ ૧૮૭॥

પુરહરનેત્રમહોત્સવતારુણ્યશ્રીર્નિરસ્તનતશત્રુઃ ।
લલિતલિકુચાભકુચભરયુગલા દૃગ્વિજિતહરિણસંદોહા ॥ ૧૮૮॥

કારુણ્યપૂર્ણનયના કલિકલ્મષહારિણી ચ સા ગૌરી ।
મુખજિતશારદકમલા વક્ત્રામ્ભોજે સદા સ્ફુરતુ કાલે ॥ ૧૮૯॥

શૂલિમનોરથપાત્રં સંતપ્તસ્વર્ણકામ્યનિજગાત્રમ્ ।
આશ્રિતહિમવદ્ગોત્રં રક્ષિતનતબાહુજચ્છાત્રમ્ ॥ ૧૯૦॥

કવિકુલજિહ્વાલોલં શશિશેખરકલિતરમ્યબહુલીલમ્ ।
નિરસિતનતદુષ્કાલં વન્દે તેજઃ સદાલિનુતશીલમ્ ॥ ૧૯૧॥

કમલસુષમાનિવાસસ્થાનકટાક્ષં ચિરાય કૃતરક્ષમ્ ।
રક્ષોગણભીતિકરં તેજો ભાતિ પ્રકામમિહ મનસિ ॥ ૧૯૨॥

કુમુદવનીશક્રીડાસ્થાનાયિતકેશભારાયૈ ।
નમ ઉક્તિરસ્તુ માત્રે વાગ્જિતપીયૂષધારાયૈ ॥ ૧૯૩॥

બાલકુરઙ્ગવિલોચનધાટીરક્ષિતસુરાદિમનુજાન્તમ્ ।
નયનયુગાસેવ્યં તદ્ ભાતીહ ધરાતલે નિયતમ્ ॥ ૧૯૪॥

કુશલવિધયે તદસ્તુ પ્રસૂનવિશિખારિકૃતલીલમ્ ।
કબલિતપદનતદૈન્યં તરુણામ્બુદમેચકં ધામ ॥ ૧૯૫॥

જનનિ કદા વા નેષ્યામ્યહમારાદર્ચિતત્વદીયપદઃ ।
નિમિષમિવ હન્ત દિવસાન્ દૃષ્ટ્વા ત્વામાદરેણ કલ્યાણીમ્ ॥ ૧૯૬॥

કવિવાગ્વાસન્તીનાં વસન્તલક્ષ્મીઃ પુરારિદયિતા નઃ ।
પરમાં મુદં વિધત્તે કાલે કાલે મહાભૂત્યૈ ॥ ૧૯૭॥

ત્રિભુવનસુન્દરરૂપં તેજસ્તદ્ ભક્તિતઃ સમભ્યર્ચ્ય ।
ગરુડેન યાતિ કુતુકાદથવા હંસેન સુરસેવ્યઃ ॥ ૧૯૮॥

તવ પદપદ્મે ભક્તિર્ન મે તથાપિ તવદીયકૃપયાહમ્ ।
ધ્યાયામ્યન્વહમમ્બ ત્વામારાદાદરાત્ સિદ્ધ્યૈ ॥ ૧૯૯॥

યો દેવ્યાઃ પદસરસિજનતિભાક્ તસ્યેહ સિધ્યન્તિ ।
સ્થિરવિભુતા સત્સઙ્ગઃ સાયુજ્યં ચાપિ કાલેન ॥ ૨૦૦॥

હિમગિરિતપઃફલં તન્મુનિજનહૃદયાબ્જનિત્યકૃતનૃત્તમ્ ।
કરુણાલોલાપાઙ્ગં તત્ તેજો ભાતુ નિઃસમં વદને ॥ ૨૦૧॥

જનનિ તરઙ્ગય નયને મયિ દીને તે દયાસ્નિગ્ધે ।
તેન વયં તુ કૃતાર્થા નાતઃ પરમસ્તિ નઃ પ્રાર્થ્યમ્ ॥ ૨૦૨॥

મુનિહૃદયપદ્મહંસી શિવકેલીસદનરત્નદીપકલા ।
હિમવત્પુત્રી કૃપયા મામવતિ મહૌષધી કલિવ્યાધેઃ ॥ ૨૦૩॥

પ્રતિફલતુ ભાવનાયામસ્માકં સા સ્ફુરત્કૃપાધારા ।
પુરહરદૃક્સાફલ્યં કૈલાસે કિમપિ નિશ્ચિતં તેજઃ ॥ ૨૦૪॥

સજ્જનમાનસધામ્ને નમ ઉક્તિર્મે શ્રુતીડ્યનિજભૂમ્ને ।
શિવવામભાગધામ્ને મહાવિભૂત્યૈ હિ શઙ્કરીનામ્ને ॥ ૨૦૫॥

દેશિકમાનસવિહરણકલાજુષે ભક્તિરસ્તુ મે તસ્મૈ ।
યચ્ચન્દ્રમૌલિલોચનચાપલ્યં રક્ષિતસ્વભક્તૌઘમ્ ॥ ૨૦૬॥

નિજલોચનકેલિકલાવશીકૃતપ્રસબાણરિપુહૃદયમ્ ।
દયયા લોલિતહૃદયં તદસ્તુ તેજઃ પુરોઽસ્માકમ્ ॥ ૨૦૭॥

સતતં બદ્ધાઞ્જલિપુટમુપાસ્મહે તચ્છુભપ્રદં તેજઃ ।
યન્મરકતકાન્તિલસત્ પ્રસૂનશરવૈરિપુણ્યપરિપાકમ્ ॥ ૨૦૮॥

તીરં સંસૃતિજલધેઃ પૂરં શઙ્કરવિલોચનપ્રીતેઃ ।
સારં નિગમાન્તાનાં દૂરં દુર્જનતતેર્હિ તત્ તેજઃ ॥ ૨૦૯॥

નગરાજકન્યકા સા લસતુ પુરોઽસ્માકમાદરકૃતશ્રીઃ ।
યત્પ્રણમનાજ્જનાનાં કવિતોન્મેષઃ સદીડિતો લસતિ ॥ ૨૧૦॥

સન્નયનસારસાલીપૂષા ભૂષા ચ હરશરીરસ્ય ।
હિમગિરિતનયા યોષા ભાષાસ્તોત્રપ્રિયા ચ સા ભાતિ ॥ ૨૧૧॥

સફલયતુ નેત્રયુગલં હતનતદુરિતા હિ સા પરા દેવી ।
ધરણિધરનાયકપ્રિયસુતા ચ સોમાર્ધભૂષિતાત્મકચા ॥ ૨૧૨॥

સુમનોવાઞ્છાદાને કૃતાવધાનં ધનં શમ્ભોઃ ।
ધિષણાજાડ્યાદિહરં યદ્વીક્ષણમામનન્તિ જગતિ બુધાઃ ॥ ૨૧૩॥

કો વા ન શ્રયતિ બુધઃ શ્રેયોઽર્થી તામિમામમ્બામ્ ।
યામર્ધચન્દ્રશેખરસધર્મિણીમર્ચયન્તિ સુરનાથાઃ ॥ ૨૧૪॥

શમિતનતદુરિતસઙ્ઘા હરાય નિજનેત્રકલ્પિતાનઙ્ગા ।
કૃતસુરશાત્રવભઙ્ગા સા દેવી મઙ્ગલૈસ્તુઙ્ગા ॥ ૨૧૫॥

કવિતારસપરિમલિતં કરોતિ વદનં નતાનાં યા ।

સ્તોતું તામહમારાત્ સા દેવી સુપ્રસન્નાસ્તુ ॥ ૨૧૬॥

પુરહરવામોત્સઙ્ગે ભજામિ લસિતં તુ તત્ તેજઃ ।
સૃષ્ટિસ્થિતિલયકાર્યં યજ્જનયતિ કાલભેદેન ॥ ૨૧૭॥

કલ્યાણદાનકલનાત્ ખ્યાતા સા શાઙ્કરી લોકે ।
તદ્વૈભવકીર્તનતો વયમત્રાસાઃ પરાનન્દાઃ ॥ ૨૧૮॥

મન્દહસિતૈર્વશીકૃતશાઙ્કરહૃદયા હિ ભક્તાનામ્ ।
રક્ષણકાર્યાય પરં સામ્બા કુમ્ભોદ્ભવાદિભિર્વન્દ્યા ॥ ૨૧૯॥

નિજમૌલિચન્દ્રકિરણપ્રસારણાદ્ગાઙ્ગવીચિકાપવનૈઃ ।
તત્ક્ષણનિરસિતસુરતશ્રમા ભવાનીહ રાજતે ભૂત્યૈ ॥ ૨૨૦॥

મમ ગાહતે હિ હૃદયં નયનયુગં ત્રિપુરદમયિતુર્ભાગ્યમ્ ।
યદકૃત્રિમવાગ્ગુમ્ભૈઃ સ્તુત્યં ધ્યેય સદાભ્યર્ચ્યમ્ ॥ ૨૨૧॥

કરધૃતશૂલાદ્યાયુધજાલનિરસ્તાખિલારિવૃન્દેયમ્ ।
કુન્દાભદન્તવદનાનન્દાયાસ્તુ પ્રકામમિહ નમતામ્ ॥ ૨૨૨॥

કુચભારનમ્રગાત્રં નિજજનિપરિપૂતજનકવરગોત્રમ્ ।
સુરવૈરિકલિતકોપં ગૌરીરૂપં તદસ્તુ હતતાપમ્ ॥ ૨૨૩॥

નિટિલાત્તવહ્નિનેત્રં લોલાલકમેતદાદૃતં તેજઃ ।
નિજકેલ્યધીનશઙ્કરમસ્માકં ચાક્ષયં સ્થાનમ્ ॥ ૨૨૪॥

તવ મન્દસ્મિતલહરીવિશેષિતરુચિર્ગિરીશશશિશકલઃ ।
તવ રૂપં ગિરિશસ્ય સ્વરૂપમપિ ભાતિ યોગિનાં હૃદયે ॥ ૨૨૫॥

નીલારવિન્દલોચનયુગલામમ્બામહં નૌમિ ।
કાલારિચિત્તહરણે યલ્લીલાઃ પાટવં નીતાઃ ॥ ૨૨૬॥

શશધરભૂષિતમકુટી કવિકુલવાગબ્જશરદિયં દેવી ।
આર્તત્રાણપરાયણવિલોચના હિમવતઃ પુત્રી ॥ ૨૨૭॥

શ્રુતિપઞ્જરકેલિશુકી શઙ્કરપરિરમ્ભણોત્સુકા માતા ।
બહિરપ્યન્તર્યમિનાં ચકાસ્તિ લોકામ્બિકા કૃતત્રાણા ॥ ૨૨૮॥

ચિન્તિતવસ્તુવિધાત્રી સંતતમપિ લોકરક્ષણૈકરતા ।
સંદાનિતનાકિલસત્સંતાનસુમપ્રગલ્ભધમ્મિલ્લા ॥ ૨૨૯॥

કલિતત્રિવર્ગપદવીમપવર્ગદકલ્યસેવનામમ્બામ્ ।
ગાઙ્ગજલૈર્નલિનદલૈરારગ્વધપત્રજાલકૈરર્ચ્યામ્ ॥ ૨૩૦॥

શશિશેખરસર્વસ્વં પૂર્વાચાર્યૈઃ પુરસ્કૃતં તેજઃ ।
મામકચક્ષુર્વિષયં કદા નુ કૈલાસકલિતચઙ્ક્રમણમ્ ॥ ૨૩૧॥

મોહિતભુવના દેવી સા હિતકરનિત્યચિન્તના ભજતામ્ ।
તાડિતરિપુજનમાન્યા પીડિતનિજભક્તભવભયા જયતિ ॥ ૨૩૨॥

પ્રત્યઙ્ગલસિતભૂષા સત્યં માતા હિ શરણમસ્માકમ્ ।
કૃત્યં યમભયમસ્યાઃ સ્તુત્યં જગતીહ વૈભવં મનુજૈઃ ॥ ૨૩૩॥

અમ્બ ત્વમેવ કમલાસનાદિવૈભવવિધાત્રી ચ ।
તાં ત્વાં શરણં પ્રાપ્તાઃ લોકેઽમુષ્મિન્ કિમાશાસ્યમ્ ॥ ૨૩૪॥

કુઙ્કુમરુચિલસિતાઙ્ગં કમલાસનમાત્તકમલં ચ ।
હસ્તામ્બુજધૃતપુસ્તકરુદ્રાક્ષાદિ ચ તથા રૂપમ્ ॥ ૨૩૫॥

જિતમન્મથવરિવસ્યાસક્તં રૂપં ચ તે માતઃ ।
કાલાનુકૂલકલિતં પરતત્ત્વવિદાં ચકાસ્તિ હૃદયતટે ॥ ૨૩૬॥

હિમવન્નગેન્દ્રકન્યે ભૂસુરકૃતબહુલપૂજયા ધન્યે ।
માન્યે સુમનઃસઙ્ઘૈસ્ત્વાં કલયે હૃદિ સદા હિ કટિશૂન્યે ॥ ૨૩૭॥

નિરસિતનિષ્કઞ્ચનજનદૈન્યા કન્યા ધરાધરેશસ્ય ।
દૃક્કાન્તિવિજિતહરિણા હરિણારાધ્યા ચ સા જયતિ ॥ ૨૩૮॥

વિનતજનિતાપવર્ગા સર્ગાદિકરી ચ સા દેવી ।
નિજલીલાહૃતભર્ગા દુર્ગાદિશ્રેયસાં જનની ॥ ૨૩૯॥

કવનકૃતાં તોષકૃતે જગદવનાદિક્રિયાપેષુ ભવતુ ।
શાઙ્કરિરૂપાય પરં નમ ઉક્તિર્જ્યોતિષેઽસ્માકમ્ ॥ ૨૪૦॥

ફણિપતિભૂષિતદેહા હરભજનાનન્દસંદોહા ।
તત્ત્વૈર્હતસંદેહા ચકાસ્તુ હૃદયે વિધૂતજનમોહા ॥ ૨૪૧॥

જયતિ જનનિ ત્વદીયં રૂપં રવિકોટિતુલિતમિદમ્ ।
એતન્નાનાકારં કાલે કૃતરક્ષણં ચ ભુવનેઽપ્યમ્ ॥ ૨૪૨॥

મદનારિકણ્ઠસુષમાસાક્ષીભૂતસ્વબાહુયુગલા સા ।
કુઙ્કુમપઙ્કાઙ્કિતતનુરેષા દેવી ચકાસ્તિ બહુરૂપા ॥ ૨૪૩॥

કાઞ્ચીમણિલસિતકટિઃ કાઞ્ચીપુરભૂષણં ચ તદ્ધામ ।
યન્મન્મથરિપુમાન્યં નિજલીલાકલિતબહુરૂપમ્ ॥ ૨૪૪॥

કરપઙ્કજધૃતમાલા સૃષ્ટિસ્થિત્યાદિબહુલીલા ।
વીટીવિલસિતવદના વિરચિતનતહર્મ્યવરસદના ॥ ૨૪૫॥

વિસૃમરતાનુકમ્પા તં પાતકિવર્ગમાદરાદમ્બા ।
રક્ષતિ તનુજિતશમ્પા સા નઃ શરણં પુરઃ સ્ફુરતુ ॥ ૨૪૬॥

શૂલિનિ સુરજનપાલિનિ કાત્યાયનિ દેવિ માં પાહિ ।
સુરલોકકુસુમમાલિનિ શિવખેલિનિ ચણ્ડિકે પાહિ ॥ ૨૪૭॥

ભારતિ ભૈરવિ શાઙ્કરિ કપાલિનિ નમોઽસ્તુ તે નિત્યમ્ ।
સ્તુત્વૈવમમ્બ વાચા મનસારાધ્યં નમામિ તે પાદમ્ ॥ ૨૪૮॥

કુટિલકચં લિકુચકુચં મૃદુબાહુલતં ચ કઙ્કુમચ્છાયમ્ ।
વિલસતિ શશધરમૌલેઃ સર્વસ્વં સુકૃતપરિપાકઃ ॥ ૨૪૯॥

ઉન્મૂલયતિ શુભેતરવાર્તામપ્યમ્બ તે નામ ।
ભજનાદપિ કીર્તનતઃ કિં વા ભાગ્યં ત્વદીયભક્તાનામ્। ॥ ૨૫૦॥

પરમશિવપુણ્યકોટી નિજગતિજિતસન્મરાલગતિધાટી ।
કૃતનિત્યકામકોટી કોટીરોલ્લસિતચન્દ્રપરિપાટી ॥ ૨૫૧॥

ચન્દ્રાભરણવતંસા કંસારિમુખૈઃ સુરૈશ્ચ નુતચરિતા ।
ગજમુખષણ્મુખજનની સાસ્માકં માનસે કૃતાસ્થાના ॥ ૨૫૨॥

પરમશિવદિવ્યજાયા માયામોહિતસુરાસુરા જનની ।
કુઙ્કુમવિલસિતકાયાપાયાન્માં રક્ષતીહ કવિગેયા ॥ ૨૫૩॥

ભૂષિતરત્નાભરણા શરણાર્થિજનાલિકલ્પિતાભરણા ।
મુદિતનિજાન્તઃકરણા મરણાદિધ્વંસિની સદાવરણા ॥ ૨૫૪॥

શ્રુતિસુદતીસ્તબકાયિતચરણામ્ભોજા ચ ભોજાદ્યૈઃ ।
કૃતપરિચરણા વિસ્તૃતકરુણામ્બા શૈલરાજવરતનયા ॥ ૨૫૫॥

અધરે લસિતારુણ્યં તનૌ તુ હરમાન્યપૂર્ણતારુણ્યમ્ ।
લોચનધૃતકારુણ્યં કરે કુસુમ્ભાદિસમ્ભૃતારુણ્યમ્ ॥ ૨૫૬॥

તત્તેજો લસતિ હૃદિ સ્મરારિસંમાન્યબહુલીલમ્ ।

સૃણિપાશાઙ્કુશહસ્તં પ્રશસ્તમસ્તોદયાદિહીનં ચ ॥ ૨૫૭॥

કલિતચરાચરરક્ષણમક્ષીણોદ્દામવૈભવં કિમપિ ।
નિખિલાગમયન્ત્રકલાસારં તલ્લસતિ પુરભિદા માન્યમ્ ॥ ૨૫૮॥

ભવચિત્તરાજહંસી ભવભયમોહાદિભેદિની શરણમ્ ।
સવરક્ષણકૃતદીક્ષા શિવવામાઙ્ગોલ્લસિતમૂર્તિઃ ॥ ૨૫૯॥

તવ ચરણન્યાસવશાત્ પરિપૂતા ભૂરિયં ભૂત્યૈ ।
દેવેશમૌલિસેવ્યા તાં ત્વામારાધયામિ ગિરિતનયે ॥ ૨૬૦॥

ક્ષણમિહ માતર્દૂરે સ્યાદ્ યદિ દૃષ્ટિઃ શુભઙ્કુરી માન્યા ।
અષ્ટૈશ્વર્યોઽપિ તદા વિનષ્ટશોભો વિકલ્પશ્ચ ॥ ૨૬૧॥

અત એવ હિ કારુણ્યાલ્લોકામ્બ ત્વં સદાદૃતભવાઙ્ગા ।
ક્રીડસિ રક્ષસિ કાલે જનયસિ મોહાદિકાનથવા ॥ ૨૬૨॥

પરમશિવકેલિરસિકે યઃ કોઽપિ જનસ્તવ સ્તવં કુર્વન્ ।
નિરસિતનાકેશપદસ્તવ સારૂપ્યં ક્રમાદ્ ભજતિ ॥ ૨૬૩॥

તવ પાદપદ્મવિસૃમરકાન્તિઝરીં મનસિ કલયંસ્તુ ।
નિરસિતનરકાદિભયો વિરાજતે નાકિસદસિ સુરવન્દ્યઃ ॥ ૨૬૪॥

બાલમરાલીગત્યૈ સુરગિરિધાનુષ્કમહિતકલગીત્યૈ ।
વિરચિતનાનાનીત્યૈ ચેતો મે સ્પૃહયતે બહુલકીર્ત્યૈ ॥ ૨૬૫॥

વિતરણકલાપ્રસક્તૌ ચિન્તામણિકામધેનુસુરવૃક્ષાઃ ।
તે દૂરે તાં ત્વામહમારાધયિતું કૃતપ્રયત્નોઽસ્મિ ॥ ૨૬૬॥

વિનમદમરેશસુદતીકચસુમમકરન્દધારયા સ્નિગ્ધમ્ ।
તવ પાદપદ્મમેતત્ કદા નુ મમ મૂર્ધ્નિ ભૂષણં જનનિ ॥ ૨૬૭॥

તવ હરપુરંધ્રિ માતશ્ચરણપયોજં ક્રમાર્ચિતં યેન ।
તેનૈન્દ્રપદમપિ દ્રાગ્ વિરાજતે તત્ સમાક્રાન્તમ્ ॥ ૨૬૮॥

તવ પદસરોજપાંસુન્યાસાદ્ધન્યોત્તમાઙ્ગલસિતાશ્ચ ।
ગાયન્તિ ચ નૃત્યન્તિ પ્રમોદકૃતનુતિચયાશ્ચ રાજન્તે ॥ ૨૬૯॥

યત્પ્રણયકલહવાર્તાભીતો નિરસિતસિમેષુરપિ વિનયી ।
મદનં તમપિ વસન્તં માનયિતું સમ્પ્રવૃત્તહૃદયોઽભૂત્ ॥ ૨૭૦॥

કુસુમૈર્ગાઙ્ગૈર્વારિભિરનુનયવાગ્ભિશ્ચ નમ્રમુખઃ ।
સા પુરહરભૂષા નો મનસિ વિહરતાં કિરીટલસદિન્દુઃ ॥ ૨૭૧॥

પુરહરપરતન્ત્રં તદ્ ગતતન્દ્રં વસ્તુ નિસ્તુલમુપાસે ।
તેનૈવાહં ધન્યો મદ્વશ્યા નિરસિતાત્મતાપભરાઃ ॥ ૨૭૨॥

મુખસુષમાજિતપદ્મં પદ્મજહરિવાસવાદિબુધસેવ્યમ્ ।
કાવ્યાર્થસારમેતદ્ ગૌરીરૂપ હિ વિજયતે તેજઃ ॥ ૨૭૩॥

યસ્યાઃ પદસરસિજયોર્વિબુધકિરીટાવલિર્ગૌર્યાઃ ।
નીરાજનવિધિકલિતા સા મે કુલદૈવતં લસતુ ॥ ૨૭૪॥

કવિહૃત્કૈરવિકસનચન્દ્રિકયા શમિતતાપભરાઃ ।
મન્દસ્મિતશ્રિયા કિલ યસ્યાઃ સા ભાતિ હિમવતઃ પુત્રી ॥ ૨૭૫॥

નિરસિતતમઃપ્રચારા પૂર્વા સંધ્યેવ નગપતેસ્તનયા ।
દ્વિજસઙ્ઘોદયકલના સા મે કુલદૈવતં લસતુ ॥ ૨૭૬॥

રચયામિ નમંસિ ભૃશં શઙ્કરમણ્ડિતનિજાઙ્કવલ્લર્યૈ ।
પુણ્યાત્મને પુરારેઃ પર્વતકુલરાજતનયાયૈ ॥ ૨૭૭॥

પુરમથનભાગ્યધાટી કવિલોકસમીડ્યસૂક્તિરસધાટી ।
મુખલસિતસારવીટી વિહરતુ હૃદિ મે કૃપૌઘપરિપાટી ॥ ૨૭૮॥

અમ્બ તવ કરુણયાહં રક્ષિતસંતાનવૈભવો નિત્યમ્ ।
એતાદૃશી તુમહતી કીર્તિસ્તે જૃમ્ભતે પ્રતિદિશં હિ ॥ ૨૭૯॥

મદનપરિપન્થિમહિષી મમ માનસકલ્પિતાસના જયતિ ।
શ્રુતિમૌલિવિહિતચરણા યોગિહૃદમ્ભોજલાલિતાપિ મુહુઃ ॥ ૨૮૦॥

પશુપતિપુરંધ્રિ માતસ્તવ પાદયુગં પ્રણમ્ય જન્તુરિહ ।
વિધુતયમદૂતભીતિસ્ત્રિદિશૈરપિ માન્યતે કલિતસેવઃ ॥ ૨૮૧॥

સુરસુદતીલોલાલકમકરન્દરસવાસિતં તવ પદાબ્જમ્ ।
મમ માનસે તુ ફુલ્લં ભવતુ હિ કાલે વયં તુ ધન્યાઃ સ્મઃ ॥ ૨૮૨॥

તવ નામ યસ્ય વક્ત્રે ફાલે ચ પદાબ્જકુઙ્કુમચ્છાયા ।
સ ભવતિ માન્યસ્ત્રિદશૈરપિ ધુતસમસ્તદુરિતજાલઃ સન્ ॥ ૨૮૩॥

આસ્તાં હિ મે પુરસ્તાત્ પુરજયિનઃ પુણ્યપરિમલોલ્લાસિ ।
જનનીરૂપં સંતતમાશ્રિતરક્ષૈકક્લૃપ્તદીક્ષં તત્ ॥ ૨૮૪॥

હરિણાઙ્કમૌલિદયિતે યદિ તે દૃષ્ટિસ્તદાદરાત્ કવિતા ।
આલિઙ્ગ્ય મોદતિ ચિરં તેન હિ સર્વજ્ઞતા લોકે ॥ ૨૮૫॥

ડમ્ભાદિદુર્ગુણૌઘો ધાવતિ દૂરે ત્વદીયપદભક્તમ્ ।
ત્યક્ત્વા યદિ તે દૃષ્ટિસ્તેન હિ સર્વાઃ શ્રિયઃ કાલે ॥ ૨૮૬॥

તવ માતર્મુનિમાન્યં પદમારાધ્ય પ્રસૂનૌઘૈઃ ।
લભતે સહસ્રનયનાન્યથવાષ્ટૌ પુણ્યસંવૃતઃ પુરુષઃ ॥ ૨૮૭॥

નિર્ધૂતતમઃકન્દે મુકુન્દપદ્માસનાદિસેવ્યપદે ।
ભક્તિર્મમ હિ સદા સ્યાત્ તેનાહં ધન્યચરિતોઽસ્મિ ॥ ૨૮૮॥

નૂપુરમનિગણરઞ્જિતપાદાબ્જં માતરમ્બિકે હૃદયે ।
મમ લસતુ તવ કટાક્ષાન્નાતઃ પરમર્થનીયં હિ ॥ ૨૮૯॥

મુક્તામણિભૂષિતયા કોકિલશુકમાન્યવાગ્વિભૂષિતયા ।
હિમગિરિસુતયાહં કિલ સનાયકો ધૂતપાપાદિઃ ॥ ૨૯૦॥

નિર્ધૂતતમસિ રૂપં તવ માતર્મામકે હૃદયે ।
સ્ફુરતિ તવૈવ હિ દયયા ન મામકૈઃ કર્મભિશ્ચ વ્રતગુમ્ભૈઃ ॥ ૨૯૧॥

નિગમાન્તવેદ્યવૈભવમેતત્ તે રૂપમમ્બિકે માતઃ ।
સ્ફુરતિ મમ નયનયોરિહ તત્ર તુ હેતુસ્ત્વદીયકરુણા હિ ॥ ૨૯૨॥

ત્રિણયનસામ્રાજ્યમિદં તવ રૂપં નિખિલદેવતોપાસ્યમ્ ।
નનુ માતઃ સ્ફુરતુ સદા નાતઃ પરમર્થનીયં હિ ॥ ૨૯૩॥

હરિણાઙ્કમૌલ્યધીના કાપિપરા શક્તિરમ્બિકા ક્ષેત્રે ।
મૌલૌ ચ નિત્યવચસાં મમ ચિત્તે ભજતુ નિત્યલીલાદિમ્ ॥ ૨૯૪॥

પરિસરનતવિબુધાલીકિરીટમણિકાન્તિવલ્લરીવિસરૈઃ ।
કૃતનીરાજનવિધિ તે મમ તુ શિરોભૂષણં પદસરોજમ્ ॥ ૨૯૫॥

ભાગીરથીવ વાણી તવ નુતિરૂપા વિરાજતે પરમા ।
ઇહ માતર્યદ્ભજનં સર્વેષાં સર્વસમ્પદાં હેતુઃ ॥ ૨૯૬॥

નગપતિતનયે માતઃ શાઙ્કરિ માહેસ્વરીતિ નામાનિ ।
નિત્યં જપન્નહં તુ ત્વદીયદાસોઽસ્મિ મુક્તયે સિદ્ધઃ ॥ ૨૯૭॥

નિખિલચરાચરરક્ષાં વિતન્વતી શાઙ્કરી દયયા ।

મમ કુલદૈવતમેષા જયતિ સદારાધ્યમાન્યપદકમલા ॥ ૨૯૮॥

સર્વજનૈઃ સંસેવ્યે સંતતમપિ વાઞ્છિતપ્રદે દેવિ ।
અમ્બ ત્વમેવ શરણં તેનાહં પ્રાપ્તસર્વકાર્યાર્થઃ ॥ ૨૯૯॥

શાઙ્કરિ કથં નુ વર્ણ્યસ્તવ મહિમા વેદમૌલિગણવેદ્યઃ ।
ઇતિ નિશ્ચિત્ય પદાબ્જં તવ વન્દે મોક્ષકામોઽહમ્ ॥ ૩૦૦॥

ત્વામમ્બ બાલિશોઽહં ત્વચ્ચમત્કારૈર્ગિરાં ગુમ્ભૈઃ ।
અયથાયથક્રમં હિ સ્તુવન્નપિ પ્રાપ્તજન્મસાફલ્યઃ ॥ ૩૦૧॥

ઇતિ ગઙ્ગાધરમખિવિરચિતા અમ્બિકાત્રિશતી સમાપ્તા ।

Encoded and proofread by Sridhar Seshagiri

---

*Ambika Trishati*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*